**कुलज** त्रि० कुले सत्कुले जायते जन–ड। १सत्कुलोद्भवे। २कुलपालिकायां स्त्री टाप् शब्दरत्ना०

**कुलञ्ज** पु० कुं पृथिवीं रञ्जयति रञ्ज–णिच् अण् रस्य लः। कुलञ्जनवृक्षे राजनि० नन्द्या० ल्यु। कुलञ्जनोऽप्यत्र “कुलञ्जनः कटुस्तिक्तः उष्णश्च दीपनस्तथा। मूलदोषविनाशी च” राजनि० तद्गुणा उक्ताः

**कुलटा** स्त्री० कुलात् कुलान्तरं व्यभिचारार्थमटति अट–अच् शक०। व्यभिचारिण्यां स्त्रियाम्। या तु भिक्षार्थं कुलमटति सा कुलाटा इति तत्र न शक०। इति भेदः

**कुलटी** स्त्री कुत्सितं रट्यते रट–भाषणे घञर्थे क गौरा० ङीष् रस्य लः। मनःशिलायां रत्नमा०

**कुलतन्तु** पु० कुलस्य तन्तुरिव। कुलावलम्बने “मया च सत्यवत्या च कृष्णेन च महात्मना। समवस्थापितं भूयो युष्मासु कुलतन्तुषु” भा० आ० ११० अ०

**कुलतिथि** स्त्री द्वितीयाषष्ठीदशमीभिन्नासु समतिथिषु चतुर्थ्यष्टमीद्वादशीचतुर्दशीषु यथोक्तं तन्त्रसा० “द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्। विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः”

**कुलत्थ** पु० कुलं भूलग्नं सत् तिष्ठति स्था–क पृषो०। १कलायभेदे (कुलत्थकलाइ) २वनकुलत्थे स्त्री टाप् रत्नमा०। तत्पर्य्यायादि भावप्र० उक्तं

“कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ। कुलत्थः कटुकः पाके कषायः रक्तपित्तकृत्। लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान्। हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान्। स्वेदसंग्राहको मेदोज्वरकृमिहरः परः।” भावप्र० कुलत्थिकेति निर्द्देशात् स्त्रीत्वमपि सा च उपचारात् ३तदुल्याञ्जने ४वनकुलत्थायां च स्त्री राजनि० “कुलाली लोचनहिता चक्षुष्या कुम्भकारिका लुलत्थिकेति” राजनि० वनकुलत्थापर्य्याये उक्तेः। स्वार्थे क। तत्रैवार्थे राजनि० कुलत्थे भावप्र० संज्ञायां कन्। कुलत्थाञ्जनाकारप्रस्तरभेदे अमरः।

**कुलत्थाञ्जन** न० कुलत्थया कृतमञ्जनम्। अञ्जनभेदे “मलापहारि चक्षुष्यं कषायं कटुकं हिमम्। विषविस्फोटककण्डूनां नाशकं व्रणदोषहृत्” राजनि० तद्गुणा उक्ताः

**कुलदीप** पु० कुले कुलाचारे विहितोदीपः तन्त्रसारोक्ते कुलाचाराङ्गे १दीपभेदे “अर्केन्दुसितवाटशालतूलनिर्म्मितवर्त्तिकम्। प्रदीपं तत्र संस्थाप्य अस्त्रैस्तत्र सपूजयेत्। हते तस्मिन् कुलदीपे विघ्नैश्च परिभूयते। तदधश्चास्त्रमन्त्रेण निखनेत् कुलदीपकम्” कुलं दीपयति अण् उप० स०। २कुलप्रकाशके कुलश्रेष्ठे त्रि०

**कुलदेवता** स्त्री० कुले पूज्या देवता। १कुलक्रमेणोपास्य देवतायाम् गौर्य्यादिषु षोडशसु मातृषु मध्ये २मातृभेदे च। ताश्च वृहत्परिशिष्टे उक्ता यथा “गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह। आदौ विनायकः पूज्यो अन्ते च कुलदेवता”

**कुलदेवी** स्त्री कुलैः कुलाचारैरुपास्या देवी। १तन्त्रोक्ते देवीभेदे कुलदेवताश्च तन्त्ररा० उक्ता यथा

“त्रिपुरा त्रिपुरेशी च सुन्दरी पुरसुन्दरी। श्रीमालिनी च सिद्धाम्बा महात्रिपुरसुन्दरी। प्रकटाख्या तथा गुप्ता तथा गुप्ततरा परा। सम्प्रदायाकुला कौला रहस्यातिरहस्यगा। परम्पररहस्या च तथा कामेश्वरी शुभा। भगमाली नित्यक्लिन्ना भैरवी वह्निसुन्दरी। महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी। नित्या नीलपताका च विजया सर्वमङ्गला। ज्वालांशुमालिनी चित्रा वशिनी शुभगाकुला। पूर्णाख्या च तथा वत्सा कामेशी मोहिनी तथा। विमला वरुणा देवी जयिनी कूलभैरवी। सर्वेश्वरी तथा कौली वागीशी सर्वकामिनी। सिद्धेश्वरी तथा चोग्रा दुर्गा महिषमर्द्दिनी। स्वप्नावती शूलिनी च मातङ्गी सुरसुन्दरी। महाकाली महोग्रा च चित्ररूपा महोदरी। प्राणविद्या तथैकाक्षी चैकपादा महाङ्कुशा। वामा शिवा तथा ज्येष्ठा सुरूपा चारुहासिनी। त्रिखण्डा त्रिशिरा गौरी विन्ध्याचलनिवासिनी। क्षोभिणी मोदिनी भद्रा ललिता बहुरूपिका। सर्व्वसम्पत्करी तारा भवानी विश्वहारिणी। कुलेश्वरी महाविद्या कथिता तव भैरव!”। कुलैः कुलजैरुपास्या देवी २वंशपरम्परया उपास्ये देवीभेदे च

**कुलद्रुम** पु० “श्लेष्मान्तकः करञ्जश्च बिल्वाश्वत्थकदम्बकाः। निम्बो वटोडुम्बरौ च धात्री चिञ्चा दश स्मृताः” इत्युक्तेषु श्लेष्मान्तकादिषु दशसु [ वंशरक्षके पुत्रे त्रिका०

**कुलधारक** पु० कुलं धारयति स्थिरीकरोति धृ–णिच्–ण्वुल्।

**कुलधुर्य्य** त्रि० कुलेषु धुर्य्यः अग्र्यः। कुलश्रेष्ठे

**कुलनक्षत्र** न० “वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्। कुलानि समधिष्ण्यानि शेषाणि चाकुलानि वै” तन्त्रसा० उक्तेषु साभिजित्काष्टाविंशतिनक्षत्रमध्ये आर्द्राभिन्नसमसंख्यकेषु नक्षत्रेषु तत्फलमुक्तं तत्रैव “तिथिवारे च